# shrIshrInivAsastavaH

# શ્રીશ્રીનિવાસસ્તવઃ

## Document Information

Text title : shrIshrInivAsastava

File name : shrInivAsastava.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Author : shrIshailastAtayAchArya

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીશ્રીનિવાસસ્તવઃ

શ્રી શ્રીનિવાસપરબ્રહ્મણે નમઃ
આત્રેય શ્રીવેઙ્ગટાધ્વરિણઃ કૃતૌ
શ્રવણાનન્દે
પ્રથમશતકમ્
આચક્રાયુધમા ચ મામકગુરોરાચાર્યવર્ગં ભજે
યસ્યાન્તર્નિગમાન્તદેશિકયતિશ્રેષ્ઠૌ મુનિર્યામુનઃ ।
રામસ્તામરસેક્ષણઃ સ ચ મુનિર્નાથઃ શઠારાતિરિ-
ત્યન્તસ્સન્તમસચ્છિદઃ શ્રુતિદૃશામગ્રેસરા જાગ્રતિ ॥ શ્રીઃ ॥

યા કલ્યાણનિધિર્વ્રજન્તિ શરણં યામેવ ધીમેદુરા
યક્ષેશન્તિ યયેક્ષિતા ભુવિ જના યસ્યૈ હરિસ્તિષ્ઠતે ।
યસ્યા જાતમિદં વદન્તિ ભુવનં યસ્યાઃ સદસ્યાઃ સુરા
યસ્યામાયતતે શિવં ભગવસ્તામિન્દિરાં ચિન્તયે ॥ ૨॥

માકાનેકહગર્વચર્વણચણૈર શ્રાન્તવિશ્રાણનૈ-
ર્માનાકાઙ્ક્ષિતસંવિધાનનિપુણે નારાયણે જાગ્રતિ ।
કષ્ટં કષ્ટમુપેત્ય દુષ્ટનૃપતિદ્વારક્ષમા રક્ષ મા-
મિત્યાક્રન્દકૃતાં વૃથૈવ દિવસાન્યેતાનિ યાતાનિ નઃ ॥ ૩॥

તૂર્ણં દુર્નરપાલવર્ણનમહાદુર્નાટકોપક્રમં
દોષં શેષયિતું વૃષાચલપતે તોષં ચ નેતું સતઃ ।
અત્રામુત્ર ચ લબ્ધુમગ્ર્યસુમનોલભ્યાનિ ભાગ્યાન્યમી
પદ્માકાન્ત તવ સ્તવે ભવદવૈરાર્તાઃ પ્રવર્તામહે ॥ ૪॥

વાચા વાઞ્છતિ યત્તવ સ્તવમિહ પ્રહ્વાપિ જિહ્વા ચિરા-
દારાધ્યામિ ભવન્તમિત્યપદિશંસ્તેનાપરાધ્યામિ તે ।
યદ્વાઽસાવતિબાલવાગિતિ કૃપાવ્યાજાય તે જાયતે
સન્દત્તે શિશુકૈઃ શુકૈશ્ચ કલિતો વર્ણોઽપિ કર્ણોત્સવમ્ ॥ ૫॥

માલીમસ્યમવાપિતા ઘનતમઃપ્રાયૈર્મુરારે ચિરા-
દિઙ્ગાલૈરિવ જઙ્ગમાધમગુણાભાસૈરિયં ભારતી ।
તત્તાદૃગ્ભિરશઙ્કરશિરઃકમ્પસ્ય સમ્પાદકૈ-
ર્ગમ્ભીરૈરવદાયતે તવ ગુણૈર્ગાઙ્ગૈસ્તરઙ્ગૈરિવ ॥ ૬॥

જમ્ભાલમ્ભનચિત્તકમ્પનમહાકુમ્ભાભવક્ષોજભૃ-
દ્રમ્ભાધામરશમ્ભલીદૃઢરીરમ્ભાદિકં ભાવુકમ્ ।
શમ્પાલોલમવેક્ષ્ય મુહ્યતુ જનઃ કિં પામરેણામુના
ત્વં પાદામ્બુજચુમ્બનં ભગવતઃ સમ્પાદયેથા મનઃ ॥ ૭॥

વેદૈર્વક્તુમજાદયો ગુણગણાન્ વિશ્વેશ તે નેશતે
સ્તોતું તાન્ મિતયા ગિરા વ્યવસિતો હાસ્યાય હા સ્યાદયમ્ ।
સિન્ધું રાઘવસેતુનાઽપિ તરિતું તં સર્વતો દુશ્શકં
કો વા લઙ્ઘયિતું વ્યવસ્યતિ  કુશસ્તમ્બેન કુમ્ભેન વા ॥ ૮॥

મુગ્ધે વાણિ નૃણાં ગુણાઃ કતિપયે મિથ્યા નિબદ્ધા ઇતિ
પ્રોત્સિક્તા ભગવદ્ગુણાનુકથનારમ્ભાય કિં જૃમ્ભસે ।
આકૃષ્ટાઃ કતિચિદ્ વનેષુ હરિણા ઇત્યાજિહાર્ષામહો
લુબ્ધો લબ્ધમદો વિધાસ્યતિ વિધોરઙ્કે કુરઙ્ગેઽપિ કઃ ॥ ૯॥

ત્વત્કલ્યાણગુણામૃતાર્ણવસુધાલેશોઽપિ લીઢો ભવં
હન્તીતિ સ્તવવિસ્તરેષ્વપટુતા નાતીવ દોષાય નઃ ।
આપાતાપ્લવ એવ જહ્નુદુહિતર્યહ્નાય શુદ્ધ્યૈ ભવેત્
તસ્યા નેતરગાધવારિષુ તલસ્પર્શોઽપિ નાપેક્ષિતઃ ॥ ૧૦॥

સન્દર્ભે મમ માઽસ્તુ સુન્દરતયા સન્તોષસાન્દ્રો બુધઃ
કિન્તુ ત્વદ્ગુણલેશપેશલતયા સન્તુષ્યતુ શ્રીપતે ।
રાજાનો મણિપેટિકામવહિતા રક્ષન્તિ યત્ તત્ર નો
પેટીસૌષ્ઠવમેવ હેતુરપિ તુ ખ્યાતં મણેર્ગૌરવમ્ ॥ ૧૧॥

નાદ્યં ભૂતમહો વહામિ  શિરસા ત્વત્પાદજાતં ન ચ
દ્વૈતીયીકમથ ત્વદીક્ષણભુવઃ શૌરે તૃતીયસ્ય વા ।
અન્તે નાવસમપ્યવાપ્ય જનનં તુર્યાન્ન વા પઞ્ચમે
કિઞ્ચાહં ચરતાં ગુરુસ્તદપિ તે સ્તોત્રે પ્રવર્તે કથમ્ ॥ ૧૨॥

ઓઙ્કારસ્ય રહસ્યમિત્યજ ઇતિ બ્રહ્મેતિ સર્વાત્મના-
માત્મેતિ પ્રકૃતેઃ પરઃ પુરુષ ઇત્યાદ્યઃ સ્વયમ્ભૂરિતિ ।

વેદાન્તૈરવબોધિતાય ભગવન્ વિશ્વૈકજીવાતવે
બોધાનન્દમયાય સિન્ધુદુહિતુર્નાથાય તુભ્યં નમઃ ॥ ૧૩॥

યશ્ચક્ષુર્જગતાં તદેવ નિગમાસ્ત્વચ્ચક્ષુરાચક્ષતે
લક્ષ્મીનાથ તથાપિ દૃશ્યમિતરાદૃશ્યઃ સ્વયં પશ્યસિ ।
અપ્યેતચ્છતમન્યુપાવકજનિસ્થાનં સદા નઃ પુન-
ર્વક્ત્રં દેવ તવ પ્રસાદશિશિરં હર્ષં દૃશોર્વર્ષતિ ॥ ૧૪॥

તત્તાદૃક્કરુણારસૈરવિરલૈસ્ત્વન્માનસં શીતલં
તાપાનાં ત્રિતયં હરેદિતિ હરે ધૈર્યં મમોદઞ્ચતિ ।
તજ્જન્મા વિવૃણોતિ શીતકિરણસ્તચ્છૈત્યમત્યુજ્જ્વલં
લિઙ્ગં કાર્યગુણં હિ કારણગુણે શંસન્તિ નિસ્સંશયમ્ ॥ ૧૫॥

નિત્યાય સ્વતનુસ્થવારિધિવરાપત્યાય મૃત્યુઞ્જય-
સ્તુત્યાય ક્ષપિતપ્રણમ્રજનદૌર્ગત્યાય સત્યાત્મને ।
ઇચ્છાનિર્મિતવિશ્વજન્ચવનસંહારાય નિશ્શ્રેયસ-
દ્વારાય સ્થિરસમ્પદે નમ ઇદં નારાયણાયાસ્તુ તે ॥ ૧૬॥

દીનાનાં સુરધેનવે તનુભૃતામન્તસ્તમોભાનવે
માયાતૂલકૃશાનવે કલયતે માનક્ષતિં દાનવે ।
નિર્ધૂતાખિલકર્મણે વિનમતાં નિત્યેન્દિરાનર્મણે
તુભ્યં નિર્મલધર્મણે નમ ઇદં કુર્મઃ પરબ્રહ્મણે ॥ ૧૭॥

પાદામ્ભોજમહં ભજામિ ભવતો વેદાઞ્ચલૈરઞ્ચિતં
પ્રખ્યાતાત્ કિલ પન્નગાચલપતે યસ્ય પ્રભાવાદસૌ ।
સિદ્ધા મૂર્ધ્નિ ફનીશ્વરસ્ય પૃથિવીં શર્વસ્ય ચાપો મુને-
રગ્નિશ્ચાક્ષપદસ્ત્રિવર્ણજનુષાં શુશ્રૂષકાપ્તિસ્તથા ॥ ૧૮॥

મૂર્તીનાં તિસૃણાં પરા તુ કતમેત્યબ્જાક્ષ સંશેરતે
ભ્રાન્તિં યાન્તિ ચ દેવતાન્તરપરૈર્યે વાઙ્મયૈસ્તામસૈઃ ।
યઃ પાદામ્બુ દદાતિ યસ્તદુપસઙ્ગૃહ્ણાતિ ગૃહ્ણાતિ વા
યશ્ચૈતચ્છિરસૈવ તેષુ પરમઃ કો વેતિ પૃચ્છામિ તાન્ ॥ ૧૯॥

પર્યઙ્કુસ્તવ પઙ્કજાક્ષ ગિરિજાપ્રાણેશિતુર્ભૂષણં
ચારુ ત્વચ્ચરણારવિન્દસલિલં ચૂડાપદે માલિકા ।
મન્ત્રો નિત્યજપોચિતો નનુ ભવન્નામૈવ તદ્ઘોષિતઃ
પારમ્યે ભવતો મુકુન્દ ભુવિ કઃ સન્દેગ્ધિ મન્દેતરઃ ॥ ૨૦॥

નાલીકે જનનં સ્થિતિં ચ ભજતો નારાયણ બ્રહ્મણઃ
સ્થાનેઽભૂદ્ રજ એવ કારણગુણઃ કાર્યે હિ સૂતે ગુણમ્ ।
ઈશાને પુનરન્ધકારિપદભાજ્યર્હં તમસ્તત્ કિલ
શ્રીવાસે ત્વયિ સારસત્વવિભવઃ સઞ્જાઘટીતિ સ્ફુટમ્ ॥ ૨૧॥

નાગેન્દ્રાદ્રિવિહાર સારસવનસ્તોમપ્રકાશાવહા
ધીરોદારપદક્રમા મતિમતાધ્યેયા સુવર્ણાકૃતિઃ ।
પુષ્યન્તી નિજમૌલિના સુમનસો જ્યોતિષ્મદઙ્ગોજ્જ્વલા
ત્રય્યેષા સુરપૂજ્ય રજ્યતિતરાં ત્વય્યેવ લક્ષ્મીરિવ ॥ ૨૨॥

નિત્યાપાકૃતમીર્નિરત્યયશુભાધારૈર્વૃતો બાન્ધવૈઃ
પ્રૌઢાભસ્થિરધીરસન્નભવનસ્થાયી વ્યથાભારહૃત્ ।
સદ્ગોષ્ઠીષુ સદા વિભાનમધિકં પ્રાપ્તઃ શ્રિતસ્ત્વાં હરે
તત્તુલ્યસ્ત્વદનાશ્રિતશ્ચ ભગવન્નન્ત્યે ભઙ્ગં વિદુઃ ॥ ૨૩॥

શ્રેયસ્તોયદસમ્પ્રદાયરસિકચ્છાયઃ સહાયઃ શ્રિય-
શ્ચિન્તારત્નસપત્નવીક્ષિતલવશ્ચેક્રીયતામન્વહમ્ ।
યો વિશ્વેન ચ ગાત્રવાન્ હિમરુચાઽપ્યુષ્ણાંશુના નેત્રવાન્
સુગ્રીવેણ ચ મિત્રવાન્ કુશલવબ્રહ્માદિભિઃ પુત્રવાન્ ॥ ૨૪॥

પૂર્વં ત્વત્પદપાંસુના બલિરિપો પૂતા જલધ્યદ્ગના
પુંસઃ સાઽપિ સુરાપગા વિતનુતે પૂતાન્ સુરાપાનપિ ।
પત્ની યોગિવરસ્ય સા સુરપગા પ્રાપ્તા વિશુદ્ધિં પરાં
તેનેત્યત્ર ન વિસ્મયઃ સ મમ કિં પાપં ન લોપં નયેત્ ॥ ૨૫॥

મામારાધ્ય દુરત્યયં સ્વયમમી માયાપયોધિં તર-
ન્ત્વિત્યાલોચ્ય સહેન્દ્રિયૈરિહ વપુસ્ત્વં ચેતનેભ્યોઽદિશઃ ।
તેષ્વેકે તત એવ દુષ્કૃતશતં સઞ્ચિન્વતે શ્રીપતે
ક્લૃપ્તે તાપશમાય વિન્દતિ સરસ્યન્ધસ્તુ પાતવ્યથામ્ ॥ ૨૬॥

ગોવિન્દેતિ કૃપાકરેતિ કમલાકાન્તેતિ કૃષ્ણેતિ વા
કાકુત્સ્થેતિ રઘૂદ્વહેતિ જલદશ્યામેતિ રામેતિ વા ।
વૈકુણ્ઠેત્યતિચણ્ડકણ્ટકવનીદાવેતિ દેવેતિ વા
શેષાદ્રીશ તવૈવ નામ કથયન્ શ્રેયો ન વિન્દેત કઃ ॥ ૨૭॥

કલ્યાણૈકનિકેતનં તદનઘં કાલામ્બુદશ્યામલં

ચિત્તે નૃત્યતુ શેષભૂધરશિરોરત્નં ચિરત્નં મહઃ ।
યસ્યોરસ્યનિશં સુતા જલનિધેર્યસ્યાસ્તિ તન્મેખલા
પાર્શ્વે યસ્ય પદે ચ તત્પ્રિયતમા યત્ તત્ર શેતે સ્વયમ્ ॥ ૨૮॥

દુરાદેવ નિરસ્ય દુષ્ટનૃપતિદ્વારાગ્રનિત્યસ્થિતિં
તારાવલ્લભદુર્લભપ્રભમુખં ધારાધરશ્યામલમ્ ।
પારાવારસુતાસખં સુમનસામારાધયામઃ પ્રભું
ઘોરાપારસમસ્તદુષ્કૃતપરીહારાય નારાયણમ્ ॥ ૨૯॥

કીર્તિં નશ્ચિરવર્તિનીં ક્ષિતિતલે પુષ્ણાતુ કૃષ્ણામ્બુદઃ
કશ્ચિત્ તાપહરો ગૃહીતકમલઃ કલ્લોલિનીવલ્લભાત્ ।
ધિન્વન્ જીવનદાનતો જગદિદં તન્વન્નદીનાં શ્રિયં
પ્રાપ્તઃ સાધુકદમ્બજૃમ્ભણકરઃ શ્રીવેઙ્કટક્ષ્માધરમ્ ॥ ૩૦॥

આસ્તામષ્ટનવૈર્દિનૈરપયતી પ્રાસ્તાપર્વર્ગસ્પૃહા
વૃષ્ણોન્તઃપુરકેળિતાણ્ડવવિધૌ તૃષ્ણા કદુષ્ણાઞ્ચિતા ।
દીક્ષામાશ્રિતરક્ષણે કૃતવતો મોક્ષાય લક્ષ્મીપતેઃ
સાક્ષદેવ પદારવિન્દવિષયાં પ્રેક્ષામપેક્ષામહે ॥ ૩૧॥

કલ્યાણાનિ ચિરં તરઙ્ગગયતુ નઃ કારુણ્યકલ્લોલિની-
કાન્તસ્સ્વાન્તચરસ્સતાં સફલયન્ કાકોદરેન્દ્રાચલમ્ ।
આમોદાદમૃતં દદાતિ વિબુધવ્રાતાય જાતાદરો
ગામ્ભીર્યૈકનિધિર્ઘનૈરભિગતો યો જીવનપ્રેપ્સુભિઃ ॥ ૩૨॥

પુણ્યારણ્યમહીરુહૈરવિરલે પુષ્પાસવૈશ્શીતલે
નાનાદિગ્જનસેવ્યમાન શિખરે નાગાધિપક્ષ્માધરે ।
આવિર્ભૂતમુપાસિતં મુનિજનૈરપ્રાકૃતં દૈવતં
પદ્માકાન્તભુજાન્તરં શુભપરીપાકાદ્વિલોકામહે ॥ ૩૩॥

અઙ્ઘ્રિં જિઘ્રતિ વેઙ્કટાચલપતેરારુહ્ય ચોરુદ્વયી-
મધ્યાસ્તે રશનામથાટતિ કટોમાસેવતે નન્દકમ્ ।
વક્ષસ્થાં શ્રયતે શ્રિયં વિહરતે શઙ્ખે રથાઙ્ગે ચ ધી-
રાલીઢે મુખચન્દ્રમણ્ડલસુધાં કોટીરમાટીકતે ॥ ૩૪॥

ધ્યાતં યોગકલાવિલાસરસિકૈશ્શીતં દયાસ્રોતસા
ખ્યાતં મૌળિષુ કૃત્રિમેતરગિરાં ક્રીતં શ્રિયા વિભ્રમૈઃ ।
વેતણ્ડેન્દ્રવિપદ્વિમોચનચણં વાતન્ધયક્ષ્માધરે

જાતં ધામ નિરામયં પ્રશમયત્વા તદ્ગુજાતં મમ ॥ ૩૫॥

હેમાટોપવિડમ્બિગાત્રસુષમાં વામાલકાં કામપિ
પ્રેમાવેશવશેન વક્ષસિ વહન્વૈમાનિકેન્દ્રાઞ્ચિતઃ ।
ક્ષેમાણિ સ્વયમાતનોતુ જગતાં કામાભિરામાકૃતિં-
ર્ભૂમા કોઽપિ ભુજઙ્ગભૂધરશિરસ્સીમાતમાલોપમઃ ॥ ૩૬॥

પ્રાતર્નાતનવં તવાભિગમનં પશ્ચાત્ત્વદર્ચાક્ષમં
દ્રવ્યં નાર્જયમાચરં ન ચ તતઃ પ્રાજ્યાં ત્વદિજ્યામષિ ।
સ્વાધ્યાયં ન ચ હર્ષહેતુમજપં નાધ્યાયમઙ્ઘ્રી ચ તે
તન્મે જન્મ વિપશ્ચિતોઽપિ વિફલં શૌરે તિરશ્ચામિવ ॥ ૩૭॥

ભોગીશાનમહીધરેન્દ્રમકુટીપાટીરવાટીચર-
દ્ભિલ્લોત્ફુલ્લસરોજપત્રનયનાનેત્રૈકપાત્રાયિતઃ ।
નાભીપદ્મનિવાસિધાતૃવદનપ્રોદ્યજ્જરદ્ભારતી-
ગાનાકર્ણનહૃષ્ટકર્ણયુગળઃ પાયાદપૂર્વઃ પ્રભુઃ ॥ ૩૮॥

નાભેરેવ બભૂવ યસ્ય ગગનં નેત્રાદસૌ તન્મણિઃ
ચિત્તાત્તત્પરિપન્થિ ધામ શિશિરં તચ્છેખરઃ ફાલતઃ ।
પ્રાણાત્તત્કરકઙ્કણાશનમદોમિત્રં ચ વક્રાદયં
શેષાદ્રાવવલોકિતો હરિરુરોભૂષાયિતાન્તઃપુરઃ ॥ ૩૯॥

શૌરે વાહનયાઞ્ચકર્થ શકુનિં મુક્ત્વા ગજાશ્વાદિકાન્
સર્પે સંવિશસે કથં મણિમયે તલ્પેઽપ્યનલ્પે સતિ ।
વિસ્તીર્ણાલયહીનવત્ સુબહુષુ સ્થાનેષુ સત્સ્વપ્યહો
પુત્રં નાભિબિલે ન્યધાઃ કથમિમાં પત્નીં ચ વક્ષસ્થલે ॥ ૪૦॥

અવિરતમધુપાનક્ષુભ્યદક્ષિભ્રુવાણા-
મવનિભૃદધમાનામાસ્યમાત્મમ્ભરીણામ્ ।
પરુષતમમપાસ્ય પ્રત્યહં નિત્યહર્ષ-
પ્રદમિદમવલોકે પદ્મનાભાઙ્ઘ્રિપદ્મમ્ ॥ ૪૧॥

સકલકુશલદાયી સર્વદેવાતિશાયી
પ્રબલદુરિતલાવી ભક્તચિત્તાનુસેવી ।
ભવગહનવિદારી પારિજાતાપહારી
ફણિપતિગિરિવાસી પાદુ પદ્માવિલાસી ॥ ૪૨॥

ઉરુતરદુરિતૈઘધ્વંસદક્ષૈઃ કટાક્ષૈઃ
ઉપચિતકમલાનામુત્પલશ્યામલાનામ્ ।
ફણિગિરિનિલયાનાં ભક્તદત્તાભયાનાં
દૃઢમતિરહમઘ સ્તોમમભ્યેમિ ભાસામ્ ॥ ૪૩॥

પ્રબલદનુજપાળીપ્રાણસંહારકેળી-
પટિમઘટિતકીર્તિર્ભાસ્વદાનન્દમૂર્તિઃ ।
ફણિગિરિગૃહમેધી ભક્તબાધાનિરોધી
ભવતુ હૃદિ મમાયં પ્રાસ્તુવન્નાગમા યમ્ ॥ ૪૪॥

કમલવિમલશોભાવિભ્રમાદભ્રમાન્-
ક્ષપણનિપુણવક્ત્રઃ કૌણપાનામમિત્રઃ ।
ઉરસિ સરસિજાક્ષીમુદ્વહન્વિદ્વદાઢ્યં-
કરણચરણરેણુઃ કોઽપિ પાયાદપાયાત્ ॥ ૪૫॥

વિવિધનિગમસારે વિશ્વરક્ષૈકધીરે
વૃષશિખરિવિહારે વક્ષસાઽઽશ્લિષ્ટદારે ।
ભગવતિ યદુવીરે ભક્તબુદ્ધેરદૂરે
ભવતુ ચિરમુદારે ભાવના નિર્વિકારે ॥ ૪૬॥

અનિશમુરુભિરત્રામુત્ર ચ ક્લેશમૂલૈઃ
કિમુદરભૃતિકાર્યૈરાપ્રયાણાદવાર્યૈઃ ।
સુખમનઘમવાપ્તું સોઽહમમ્ભોદભાસં
ફણિપતિગિરિવાસં ભાવયે શ્રીનિવાસમ્ ॥ ૪૭॥

પ્રતિકટકમટિત્વા પાર્થિવાગ્રે નટિત્વા
પટુચટુશતમુક્ત્વા પાતકાન્યેવ કૃત્વા ।
કિમિહ ફલમવાપ્તં કેવલં કૈટભારેઃ
સ્મર ચરણસરોજે સન્તરામ્યન્તરાત્મન્ ॥ ૪૮॥

વશયતિ હૃદયં મે વર્ષતિ શ્રીશ હર્ષં
જનયતિ પરિશુદ્ધિં જાયતે મઙ્ગળાય ।
દમયતિ પરિતાપં દેવ નિર્હન્તિ પાપં
દરમપિ વિધુનીતે દર્શનં તાવકીનમ્ ॥ ૪૯॥

કબલિતઘનવર્ગઃ કાન્તિભિઃ પેશલાભિઃ
કમલવનનિવાસાકાન્તબાહાન્તરાલઃ ।

પુરુષ ઇહ રથાઙ્ગી પૂર્ણિમાચન્દ્રબિમ્બ-
પ્રતિભટવદનશ્રીઃ પ્રાતરાભાતુ ચિત્તે ॥ ૫૦॥

સુરતરુરિવોદારો દારોપશોભિભુજાન્તરઃ
મધુરકરુણાલોકો લોકોપરક્ષણદીક્ષિતઃ ।
અખિલસુમનઃકોટીકોટીરચુમ્બિપદામ્બુજઃ
ફણિધરણિભૃન્મલ્લો મલ્લોચનાભરણાયતે ॥ ૫૧॥

તમુપનિષદાં સારં સારઙ્ગલાઞ્છનલોચનં
પ્રકટિતકૃપાસારં સારમ્ભમાશ્રિતપાલને ।
લયમિહ રુષા વારં વારં નયન્તમમું દ્વિષાં
વૃષગિરિપતિં વારં વારં શુભાય વિચિન્તયે ॥ ૫૨॥

મુનિભિરનિશં ધ્યેયા ગેયા સુરપ્રમદાજનૈઃ
વલભિદુપલચ્છાયાદાયાદદીપ્રિલસત્તનુઃ ।
ઉરસિ વિહરજ્જાયા કાયાધવાભયદાયિની
વિહિતદુરિતાપાયા પાયાદ્વૃષાચલદેવતા ॥ ૫૩॥

દુરિતભરિતે દુર્દેહેઽસ્મિન્ દુરામયદૂષિતે
મમ નવનવસ્તર્ષોત્કર્ષો ભવત્યનિવારિતઃ ।
અમુમપનયન્નમ્ભોજશ્રીકદમ્બવિડમ્બકે
તવ હૃતનમત્ખેદે પાદે રુચિં રચયેશિતઃ ॥ ૫૪॥

અભિગતિમુખૈરસ્યામિ શ્રીનિવાસ ન વાસરાન્
પ્રશમિતભવોદ્વેગૈર્યોગૈર્નયામિ ન યામિનીઃ ।
ન ચ વિરચયે નાથ ત્રુઠ્યત્તમાંસિ નમાંસિ તે
તદપિ ભવતા હા મે મુક્તિસ્પૃહાઽપિ ન હાપિતા ॥ ૫૫॥

દુરત્યયરુજાતુરે દુરિતધૂસરે નશ્વરે
હરે બત કલેવરે મતિહરે કૃતઘ્નોદરે ।
સ્પૃહામિહ વિહાય તે સ્મરતિ માનસં મે યથા
તથા કુરુ સુધાબ્ધિજાસખ દયામવિઘ્નોદયામ્ ॥ ૫૬॥

તમઃપ્રકરરુદ્ધયે તદનુ સત્ત્વસંવૃદ્ધયે
વિશુદ્ધમતિસિદ્ધયે વિમલનિર્બૃતેર્લબ્ધય ।
ભવન્તુ મયિ સન્તતં ભગવતો વૃષાદ્રિપ્રભોઃ
પ્રગેતનપયોરુહપ્રતિભટાઃ કટાક્ષચ્છટાઃ ॥ ૫૭॥

પ્રપન્નાનાં નાનાદુરિતપરિતાપવ્યતિકરં
નિરુન્ધાના ધાનાપ્રદમુનિધનેશીકૃતિચણા ।
પ્રબિભ્રાણાઽભ્રાણામપિ મદહરાં દીપ્તિમનઘામ્
ભૃતાશેષા શેષાચલશિખરભૂષા વિજયતે ॥ ૫૮॥

મુદે વો દેવોઽયં ભવતુ ભુજગેન્દ્રાચલતટી-
કૃતાવાસો વાસોરુચિનિચયધૂતાચિરરુચિઃ ।
ગજાદીનાં દીનાં શમયિતુમવસ્થાં કરુણયા
નિજગ્રાહ ગ્રાહપ્રભૃતિરિપુવર્ગં સપદિ યઃ ॥ ૫૯॥

અભીષ્ટં વો દુગ્ધામખિલમિહ ગોપાલતિલકઃ
પયોદશ્યામાઙ્ગઃ ફણિધરણિભૃત્કાનનચરઃ ।
અઘા સં વદ્ધાનામહહ જરતીનામપિ ગવાં
પરીપોષં કુર્વન્ રસમમિતમુત્પાદયતિ યઃ ॥ ૬૦॥

નમસ્તસ્મૈ ભસ્મીકૃતનરકબાણાદિવિબુધ-
પ્રતિદ્વન્દ્વિશ્રેણીવિષતરુવનીકાય મહતે ।
હુતાનાં હવ્યાનાં નિયતમુપભોક્ત્રેઽધિસવનં
પ્રશસ્તારાધ્યાય પ્રચુરરુચયે નિસ્યશુચયે ॥ ૬૧॥

વિહારિ જગદુદ્ભવસ્થિતિવિલોપનૈર્યાતનાં
ધુનાતુ મિથુનં મિથસ્તદવિયોગિ યત્રૈકકમ્ ।
વદન્તિ વસુધાધરં પુનરચઞ્ચલાભં બુધાઃ
પરં નવસુધાધરં સ્ફુરતિ ચઞ્ચલાભં તથા ॥ ૬૨॥

શુચયે રચયે પ્રણામમસ્મૈ
પ્રભવે સુપ્રભવેષપેશલાય
હરયે નિરપેક્ષણં ક્ષણં યં
વિનતા નો જનતા કદાપ્યુપૈતિ ॥ ૬૩॥

કલિકલ્મષહારિનામધેયં
કલયે તાપસમાનસાવધેયમ્ ।
મદનસ્પૃહણીયરૂપધેયં
તદનન્તાચલમૌલિભાગધેયમ્ ॥ ૬૪॥

તવ સાગરભૂસ્તુ ધર્મપત્ની

દિવસાનામધિપો નિવાસવેદિઃ ।
શિવધાતૃમુખાસ્સુતાસ્ત્વદન્યૈ-
રવધાર્યો મહિમા કથં ત્વદીયઃ ॥ ૬૫॥

મધુરં વિધુરમ્યવક્ત્રબિમ્બં
મહિતં ધામ હિતં મખાશનેભ્યઃ ।
તદહં મદહન્તૃ દાનવાનાં
વિદધે ભીત્યુદધેઃ પ્લવં ગુણાઢ્યમ્ ॥ ૬૬॥

નમતાં મમતાવલેપહન્ત્રે
વરદાય સ્ફુરદાયતેક્ષણાય ।
કરવૈ મુરવૈરિણે પ્રણામા-
નુરગોર્વીધરગો ય એષ ભાતિ ॥ ૬૭॥

કરુણાવરુણાલયં મુરારે
કમલાક્ષં કમલાક્ષમાસમેતમ્ ।
ભજતે નિજતેજસા જિતાર્કં
વિગતાંહા જગતાં ધુરન્ધરં ત્વામ્ ॥ ૬૮॥

અનન્તશૈલેશ તવાભિધાનં
ક્ષણં ગૃણન્તઃ પ્રવિશન્તિ નાકમ્ ।
રમાસખ ત્વદ્વિમુખાશ્ચ મધ્યે
રસઙ્ગતં હન્ત તમેવ યાન્તિ ॥ ૬૯॥

પ્રસાધયેદ્ યાં તપસા ચિરેણ
સ્મરાન્તક શ્લાઘ્યતરાં ગતિં તામ્ ।
વૃષાચલારણ્યનિષાદકાના
પ્રસાદલેશેન ન સાધયેત્કિમ્ ॥ ૭૦॥

દદાસિ દાસપ્રકરાય રાય
સ્તથાઽપિ નાથ ત્વમકમ્પસમ્પત્ ।
શ્રિયો વિયોગસ્ય કથા કથં સ્યા-
દહીનપૃથ્વીભૃદુપાશ્રયસ્ય ॥ ૭૧॥

પ્રાપ્તોદયો હિ પ્રથમાદ્રિશૃઙ્ગે
દોષાવસાને હરિરેષ દૃશ્યઃ ।
સંશોષયન્માનસવૃત્તિપઙ્ગં

પ્રસન્નપઙ્કેરુહશોભનાભઃ ॥ ૭૨॥

સા કાઽપિ રાકાશશિદાસ્યદાસ્ય-
મુદ્રા સમુદ્રાત્મજયા જયાઢ્યા ।
શેષાદ્રિભૂષા જલદાવિશેષા
પાયાદપાયાદ્ધસતિઃ કૃપાયાઃ ॥ ૭૩॥

અન્યાદૃશી તાર્ક્ષ્યરથા સુધાબ્ધિ-
કન્યાપદન્યાસવિશેષધન્યા ।
મૂર્તિર્મદાર્તિં મહનીયકીર્તિ-
ર્મુષ્ણાતુ કૃષ્ણા વિનતેષ્વનુષ્ણા ॥ ૭૪॥

ભવાન્ પુરાણઃ પુરુષઃ પ્રસિદ્ધો
વયોઽધિકં તાવકવાહમાહુઃ ।
કાપિ ત્વરા તે કરિરાજગર્જા-
કાલે કથઙ્કારમભૂન્મુરારે ॥ ૭૫॥

નરે નરેઽહં ધનચાપલેન
નવં નવં વ્યાતનવં સ્તવં યત્ ।
તતસ્તતં દોષમશેષમુચ્ચૈ-
સ્તવ સ્તવઃ શ્રીકમન ચ્છિનત્તુ ॥ ૭૬॥

ન મે મનો યોષિદુરોજકુમ્ભે
ન સ્વીયડિમ્ભે ન ચ શાતકુમ્ભે ।
પરં તુ રન્તુઃ કમલાલયાયાઃ
પદારવિન્દે રુચિમેવ વિન્દે ॥ ૭૭॥

અભૂરિવર્ષોન્મુખમેઘસુન્દરૈ-
રનાશ્રિતશ્રીવૃષશૈલકન્દરૈઃ ।
અનિન્દિરામન્દિરસદ્ભુજાન્તરૈ-
રલં બતાન્યૈ રિહ દેવતાન્તરૈઃ ॥ ૭૮॥

ત્વદઙ્ઘ્રિપદ્મૈકધના ધનાન્તરં
ન કામયન્તે ન ચ સાધનાન્તરમ્ ।
અનન્તશૈલેશ ભવન્તમેવ યત્
કૃણન્ત્યુપાયં ચ ફલં ચ પણ્ડિતાઃ ॥ ૭૯॥

નલિનનયન નાગશૈલવાસિન્
મલિનહૃદામપિ કલ્મષાપહન્તઃ ।
જનનમરણરોગદુઃખશાન્ત્યૈ
ચરણયુગં શરણં વૃણે ત્વદીયમ્ ॥ ૮૦॥

ગોવર્ધનોઽપિ શિરસા વિધૃતઃ કિમન્ય-
ધૈન ત્વયાધિજઠરં સકલોઽપિ લોકઃ ।
તસ્મિન્નિહ ત્વયિ વૃષાદ્રિપતેઽહમાત્મ-
રક્ષાભરં કૃશતમો નિદધામિ દક્ષે ॥ ૮૧॥

કિં ભો મનઃ કિતવલમ્પટશમ્ભલીનાં
સમ્ભોગકેલિકિલિકિઞ્ચિતસમ્ભ્રમેણ ।
અમ્ભોજદમ્ભહરનેત્રયુગો યશોદા-
ડિમ્ભો રસેન ભવતા પરિરમ્ભણીયઃ ॥ ૮૨॥

મોટ્ટાયિતં ત્રિદશપટ્ટણકુટ્ટિનીનાં
દૃષ્ટં વિનષ્ટમિદમષ્ટનવૈર્દિનૈસ્તત્ ।
હૃટ્ટીકતાં સ્થિતિમદુષ્ટિનિ શુક્સમષ્ટિ-
કુટ્ટાકદૃષ્ટિનિ ધૃતક્ષિણિ વસ્તુનીદમ્ ॥ ૮૩॥

દમ્ભોલિપાણિપુટભેદનશમ્ભલીનાં
વક્ષોજકુમ્ભપરિરમ્ભસુખોપલમ્ભમ્ ।
મા નામ ચીકમત માનસમસ્મદીયં
વૈકુણ્ઠચિન્તનરસૈર્વયમુત્સુકાઃ સ્મઃ ॥ ૮૪॥

ન મણીન્ રમણીશ્ચ સોઽહમીહે
ન હયેભ્યઃ સ્પૃહયે ન વા ગજેભ્યઃ ।
વરદશ્શરદશ્શતં દૃશૌ મે
ભુજગાદ્રૌ શરણાર્થિનો ધિનોતુ ॥ ૮૫॥

કારાગેહે સંસૃતિરૂપે ભ્રમતો મે
કા રાગે હે કૃષ્ણ વિવૃદ્ધે મતિવાર્તા ।
નાગોદારાહાર્યપતે માં સ્વયમવ્યા
નાગો દારાલઙ્કૃતમૂર્તે મમ વીક્ષ્યમ્ ॥ ૮૬॥

વન્દારુષુ મન્દારમમન્દાર્તિહરં તે
વન્દામહ ઇન્દાવપિ નિન્દાવહમાસ્યમ્ ।

મારારિકુમારાદિસમારાધિતમૂર્તે
નારાયણ ઘોરાદપચારાદિહ પાયાઃ ॥ ૮૭॥

પ્રધાનાય સમ્પન્નિધાનાય ભક્ત-
વ્યથાનાશદત્તાવધાનાય તુભ્યમ્ ।
સમસ્તાધિનાથ સ્વમસ્થાભિક્લૃપ્તં
નમસ્સ્તાદિદં નિસ્તમસ્તાવિધાયિન્ ॥ ૮૮॥

નાગરાજાચલે સાગરાગ્ર્યાત્મજા-
કાન્તબાહાન્તરો દાન્તબાધાહરઃ ।
વારિજાક્ષશ્શ્રયત્પારિજાતો જગ-
દ્રાજતે રક્ષિતું રાજતેજોમુખઃ ॥ ૮૯॥

મરુતાં ભગવન્ મરુતાં વિરતિં
લષતાં મિષતાં દ્વિષતાં તતયઃ ।
ભવતા મનુજીભવતા મૃદુતાં
જહતા મહતા નિહતા ઇહ તાઃ ॥ ૯૦॥

કિઞ્ચિત્સઞ્ચિન્તયે ગોપીકિલિકિઞ્ચિતવઞ્ચિતમ્ ।
અઞ્ચિતં જ્યોતિરમરૈરઞ્જનાદ્રાવુદઞ્ચિતમ્ ॥ ૯૧॥

સર્વદાનન્દનિલયં સાર્થયન્નવનીતહૃત્ ।
કૃષ્ણસ્ત્વં વેઙ્કટાધીશ કિં તુ શૈલેન ધાર્યસે ॥ ૯૨॥

વૃષાચલપતે કૃત્સ્નવિષાદહરણક્ષમમ્ ।
પ્રપદ્યે ભવતઃ પાદપયોરુહમહં કૃશઃ ॥ ૯૩॥

માનયામો હરે ન ત્વામાનયામો ન તે મુદમ્ ।
પનાયામોઽહહ ક્ષુદ્રાન્ ધનાયામોહતો હતાઃ ॥ ૯૪॥

પ્રપદ્યે નિરવદ્યં તત્ફણિભૂધરભૂષણમ્ ।
પરબ્રહ્મ હરબ્રહ્મદુર્લભં વલ્લભં શ્રિયઃ ॥ ૯૫॥

અઞ્જનમહીધરચરં જનમનીષા-
રઞ્જનમધોક્ષજ નિરઞ્જનમિહ ત્વામ્ ।
લોચનયુગીકૃતવિરોચનસુધાંશું
કેચન ભજન્તિ ભવમોચનમભિજ્ઞાઃ ॥ ૯૬॥

સઞ્ચરતિ યોગિહૃદિ કિઞ્ચ રવિબિમ્બે

યો લસતિ નીલઘનજાલસમમૂર્તિઃ ।
નિષ્કૃતિવિહીનબહુદુષ્કૃતિસમુત્થં
સઙ્કટમપાસ્યતુ સ વેઙ્કટગિરીશઃ ॥ ૯૭॥

ઇન્દુકરવૃન્દપરિકન્દલદમન્દા-
નન્દકરમન્દહસસુન્દરમુખશ્રિ ।
નિસ્તુલમુપસ્થિતમુરસ્સ્થિતવરસ્ત-
ન્યસ્તુ મમ શેષગિરિમસ્તગતવસ્તુ ॥ ૯૮॥

પ્રશમિતપિશિતાશં પ્રાસ્તસંસારપાશં
કૃતનતગદનાશં કીર્તિભિસ્સ્મેરિતાશમ્ ।
નવજલદનિકાશં નાગશૈલપ્રકાશં
પરિહૃતવિષયાશં ભાવયામો રમેશમ્ ॥ ૯૯॥

કલ્યાણાભ્યામશેષાભ્યુદયવિભવસમ્પીડનક્રીડનાભ્યાં
નાભ્યામભ્યુદ્ગતસ્ય દ્વિયુગમુખશિશોઃ શ્રૂયમાણસ્તવાભ્યામ્ ।
બોધામોદાર્ણવાભ્યાં ભુજગપરિબૃઢક્ષ્માધરાલઙ્કૃતિભ્યાં
દિવ્યાભ્યાં દમ્પતિભ્યાં ભવતુ નમ ઇદં દેવતાસેવિતાભ્યામ્ ॥ ૧૦૦॥

॥ ઇત્યાત્રેય શ્રીવેઙ્કટધ્વરિકૃતિષુ શ્રવણાનન્દે
શ્રીનિવાસસ્તવે પ્રથમશતકમ્ ॥

---

॥ અથ દ્વિતીયશતકમ્ ॥

શ્રિયઃ પ્રિયતમં સેવે શેષાચલશિરોમણિમ્ ।
મહિતં સુમનોવૃન્દૈર્મન્દારમિવ માદૃશામ્ ॥ ૧॥

કમનીયૈર્નિજાલોકૈઃ કમલાનન્દકારિભિઃ
તમસામપનેતારં તમેવ હરિમાશ્રયે ॥ ૨॥

પરિષ્કૃતાઞ્જનધરં પરં શ્રુત્યન્તગોચરમ્ ।
લોચનં સ્તૌમિ લોકાનાં કિમપ્યજ્ઞાનમોચનમ્ ॥ ૩॥

પ્રતીપશરભારાવલોપકં ગજપાલકમ્ ।
દધામિ હરિમાશ્ચર્યં ગુહાશયમિહાશ્રયે ॥ ૪॥

અદૃશ્યં યોગિવર્યૈરપ્યબ્જદીપ્તિકરં હરિમ્ ।

ઉપતિષ્ઠેઽધિકારુણ્યમુદ્યન્તમિવ ભાસ્કરમ્ ॥ ૫॥

દેવતામાદિમાં વન્દે ધૃતાં ભુજગભૂભૃતા ।
સમુદ્રમાશ્રિતામુર્વીં પૃથુચાપપ્રસાધિતામ્ ॥ ૬॥

આનન્દનિલયં વન્દે શ્લાઘ્યં દુગ્ધાર્ણવાદપિ ।
શ્રીધરં યત્ર જાગર્તિ પરં જ્યોતિર્નિરઞ્જનમ્ ॥ ૭॥

પ્રપન્નાભયદોસ્મીતિ સત્યાપય વચો મયિ ।
નાળીકશબ્દ ઉચિતઃ શ્રીનિવાસસ્ય તે યતઃ ॥ ૮॥

પ્રપઞ્ચાસ્યમુપાસ્ય ત્વાં નૃપઞ્ચાસ્યતિ માનવઃ ।
કરોષિ તસ્ય યત્સ્વામિન્ કરોષિતમભીપ્સિતમ્ ॥ ૯॥

વૃષાચલેશસ્ય તુષારદીધિતિત્વિષા મુખેનાર્તવિષાદહારિણઃ ।
મુદાં નિદાનં ઘુસદાવલિસ્તુતં સદા પદામ્ભોજમુદારમાશ્રયે ॥ ૧૦॥

સકૃત્પ્રપન્નાય કૃશાય દૈવતૈરનાપ્યમપ્યર્પયસિ સ્થિરં પદમ્ ।
દયાલુતા માધવ દુર્બલેષુ હિ પ્રભૂત્તમાનાં પરમં વિભૂષણમ્ ॥ ૧૧॥

અજસ્રમપ્યબ્ધિસુતાં વહન્નુરસ્યજામધિષ્ઠાય સૃજન્ પ્રજા હરે ।
ભવત્યહો મન્મથજન્મભૂર્ભવાન્ તથાપિ કન્દર્પજિતાઽભિમન્યસે ॥ ૧૨॥

ત્વ કિમિન્દુના તેન કલઙ્કિતેન યં પ્રબિભ્રતો નાપગતાન્ધકારિતા ।
તવૈવ વીક્ષે મુખચન્દ્રમદ્ભુતં તમો મુરારે હરતિ સ્મૃતોઽપિ યઃ ॥ ૧૩॥

પતઙ્ગ ઉદ્યન્નુપમાનતાં ભવ-
સ્પદો નુ[દોર્ન]દેવ પ્રતિવક્તુ [પત્તુ]મર્હતિ ।
અસંશયં દુષ્યતિ યસ્ય દર્શને
જનો યયોસ્ત્વભ્યુદયં પ્રપદ્યતે ॥ ૧૪॥

ફણભૃદદ્રીશ ગુણાલિભિઃ ક્ષમા-
ધૃણાવિરોધિક્ષપણાદિભિશ્શ્રુતમ્ ।
પ્રણામતસ્ત્વાં નિપુણાશ્રયં ત [-ણઃ શ્રયન્ સ]દા
નૃણાં પતીનેવ તૃણાવ[ય] મન્યતે ॥ ૧૫॥

મનસ્તુરઙ્ગં વિષયચ્છટાવટાન્તરે ગભીરેવ દ[પત]યાલુમાશુ મે ।
વિતુ[કૃ]ષ્ય દક્ષં વિરચય્ય શિક્ષયા
હરે તદુ[મુ]ચ્ચૈરધિરોઢુમર્હસિ ॥ ૧૬॥

સ્થિરમઙ્ગલદાયકમ્ શ્રિતાનાં પરમં ધામ વૃષાદ્રિધામ વન્દે ।
સ્મરમન્યુમદૈર્ગદૈરયુક્તા ન રમન્તે હિ યતોઽપરત્ર યુક્તાઃ ॥ ૧૭॥

વલવૈરિશિલાવલેપલોપક્ષમભૂ[ભા]મણ્ડલભવ્યદિવ્યદેહમ્ ।
પ્રણમત્તિત્રદશા[શં] દૃશોઃ પુરસ્તાત્
પરમં વસ્તુ તદસ્તુ નિષ્કલં મે ॥ ૧૮॥

તરુણાર્કકરાવમર્શહૃષ્યન્નલિનાહઙ્કૃતિહુઙ્કૃતિપ્રવીણમ્ ।
ભવમોચન લોચનદ્વયં તે ભગવન્મામકમાનસે ચકાસ્તુ ॥ ૧૯॥

ભુવનાભ્યુદયાવનાન્તલીલ સ્તવનાદેવ સતીહિતાર્થદાતઃ ।
તવ દાસ્યપદે મયીહ શૌરે ભવદાવાનલપાતિતા ન યુક્તા ॥ ૨૦॥

વૃષશૈલવનસ્થલીવિહારી મધુહારી સુમનશ્શિરસ્સુ નિત્યમ્ ।
નિહિતાઙ્ઘ્રિરલઙ્કૃતાગમાન્તો મમ ચેતઃકમલે તુ લાલગીતુ ॥ ૨૧॥

દ્યુતરો નમતાં પ્રસીદ શાર્ઙ્ગિન્ ઇતરોપાયવિધાવહં ન શક્તઃ ।
તરણૌ તરણે ત્ર[કૃ]પાં સૃજન્તૌ
ચરણૌ તે શરણં વૃણે શરણ્યમ્[ણ્ય] ॥ ૨૨॥

ઇદમેવ પદં સુરસ્રવન્તીં જનયિત્વા શિવયામ્બભૂવ શમ્ભુમ્ ।
ઇતિ માધવ દર્શયન્ કરસ્તે સતતં લોચનગોચરો મમ સ્તાત્ ॥ ૨૩॥

જગદણ્ડસહસ્રભારખેદો જઠરસ્યાતિકૃશસ્ય જતુ મા ભૂત્ ।
ઇતિ તદ્બલકલ્પનાય કટ્યાં કલિતં શ્રીધર ચિન્તયે કરં તે ॥ ૨૪॥

નતિરસ્તુ તટિદ્ઘનદ્યુતિભ્યાં શ્રિતશેષાચલશૃઙ્ગસઙ્ગતિભ્યામ્ ।
પરિપાલિતભક્તસન્તતિભ્યાં પ્રથમાભ્યામનુરૂપદમ્પતિભ્યામ્ ॥ ૨૫॥

હરિનીલનિભં હરેરુરસ્તત્કલયે શ્રીઃ કિલ યત્ર વર્તમાના ।
ઉષિતા ધ્રુવમુત્પલેઽપિ નીલે કમલા પદ્મ ઇવેતિ સૌતિ બુદ્ધિમ્ ॥ ૨૬॥

ગારુત્મતદ્યુતિવિડમ્બિનિ કૈટભારે
ગાઢે વિરાજતિ તવોરસિ કૌસ્તુભોઽયમ્ ।
દીવ્યત્તમાલગહનાહિતમેચકિમ્નિ
પ્રાચ્યાવનીધરતટે ભગવાનિવાર્કઃ ॥ ૨૭॥

સર્વજ્ઞમસ્તકગૃહીતકલસ્ય તસ્ય
ભ્રાતુર્વિધાતુમનસઃ પરમં પ્રક[હ]ર્ષમ્ ।

લક્ષ્મ્યાઃ કિમિઙ્ગિતમવેત્ય વૃષાચલેન્દો
વક્ત્રેઽર્ધચન્દ્રતિલકં વહસિ પ્રસન્નઃ ॥ ૨૮॥

ગોવર્ધનં ધૃતવતા ગુણપૂર્ણ મૂર્ધ્ના
મન્થાનમપ્યચલમૂઢવતા મહાન્તમ્ ।
અમ્ભોરુહાક્ષ વહસે કિમપક્ષપાતાત્
તં ચારુ કાઞ્ચનમયમ્ ચ [ગિરિં સુ]મેરુમ્ ॥ ૨૯॥

પ્રહ્લાદવારણવિભીષણભાનુસૂનુ-
પાઞ્ચાલરાજતનયાપ્રમુખાવનેન ।
તાવદ્બભૂવ તવ નૈવે વૃષાચલેન્દો
યાવદ્યશોઽતિકૃશમાદૃશરક્ષણેન ॥ ૩૦॥

ગ્રાહગ્રહેણ વિરટન્ કરટીવ નૈતે
લોકાન્તરાગમવિલમ્બસહિષ્ણવો મે ।
ઇત્યસ્મદાદ્યલસદાસરિરક્ષિષાતો
જાગર્તિ[ર્ષિ] નાથ વૃષભૂભૃતિ સાવધાને[નઃ] ॥ ૩૧॥

યન્મેખલાપરિલસન્મણિમઞ્જુદીપ્તિ-
પીતામ્બરસ્સુ[રં સુ]મનસઃ કથયન્તિ યા[યં] ચ ।
યદ્ભોગિભૂભૃદિતિ યશ્ચ હરે પ્રસિદ્ધં
વાસસ્તવાવહતુ તઞ્ચ સ ચ શ્રિયં નઃ ॥ ૩૨॥

અત્યુન્નતં તિલકભૂષિતમાયતાક્ષ-
મુદ્ભાસિમેખલમુદારસહસ્રપાદમ્ ।
શેષાચલેશિતરનન્તપદાભિધેયં
ત્વાં ત્વદ્ગિરિં ચ સમમેવ વિચિન્તયામઃ ॥ ૩૩॥

અલ્પેતરશ્રમવિકાસકરૈરસારૈ-
ર્ઘોરૈરલં તવ[બત] લુલાયકુલાનુસારૈઃ ।
કાઙ્ક્ષાધિકાર્પણકૃતત્રિદિવદ્રુનિન્દે
વન્દે મુકુન્દ ભવતશ્ચરણારવિન્દે ॥ ૩૪॥

અક્ષાણિ મે વિષયપઙ્કમલીમસાનિ
પ્રક્ષિપ્ય [-ક્ષાલ્ય] નાથ ગુરુણા કરુણારસેન ।
પાદામ્બુજે નનુ નિજે અમૃતપ્રદો [દે]
ષડેતાનિ તલ્પદય [સઙ્ગમય] ષટ્પદકૂજિતાનિ ॥ ૩૫॥

મન્દેતરસ્ફુરણમઙ્ગલકાલમેઘ-
મન્દેહદાયિસુષુમૈકનિકાયકાયમ્ ।
વન્દે તમેવ વરદં શરમ્બુજાક્ષં
યં દેવમાહુરરવિન્દગૃહાસહાયમ્ ॥ ૩૬॥

કમલનયન દીવ્યત્કૌસ્તુભોદારદીપં
ભવનભવતુ નસ્તદ્બાહુમધ્યાભિધાનમ્ ।
પ્રથિતસદનુભાવૈસ્સાત્વિકૈર્ભાવ્યમાનં
યદુતિલક સમિન્ધે યત્ર શૃઙ્ગારવત્વમ્ ॥ ૩૭॥

અનુચિતમહમીદૃઙ્મુક્તતાં યત્સમીહે
મશકશિશુરિવોચ્ચૈર્ભક્ત [મત્ત] માતઙ્ગરૂપમ્ ।
ક્ષમમિદમથવા મે ત્વાં પ્રપન્નસ્ય તૂર્ણં
તૃણમપિ વૃષશૈલાધીશ દિવ્યાસ્ત્રયન્તમ્ ॥ ૩૮॥

વિષદ[જ]વિતતિરાસ્તામુત્પલં ધિક્ સરોગં
કૃતમતિકઠિનૈસ્તૈર્ગોત્રભિદ્ગ્રાવભિશ્ચ ।
નિયતમમૃતદં તે નિર્મિતાતઙ્કભઙ્ગં
વપુરતિસુકુમારં વાસુદેવ સ્તુતો[વેઽ]હમ્ ॥ ૩૯॥

પ્રકૃતિમહદહઙ્કૃત્યાદિકં તત્ત્વજાતં
પુરુષમપિ શરીરં તાવકં સઙ્ગિરન્તે ।
મધુમથન પરં બ્રહ્મૈકમેવાદ્વિતીયં
ત્વમસિ તદખિલશ્રુત્યન્તતાત્પર્યભૂમિઃ ॥ ૪૦॥

નિખિલવિહિતહાતૄન્ નીતકાલાન્નિષિદ્ધૈઃ
નિરુપધિકરુણાબ્ધિસ્ત્રાતુમસ્માનકસ્માત્ ।
વિભુરપહતપાપ્મા વિશ્વભૂતાન્તરાત્મા-
પ્યધિવસસિ વૃષાગાધિત્યકાં સત્યકામઃ ॥ ૪૧॥

પુનરપિ જનનીનાં ચેન્ન કુક્ષૌ વિવિક્ષા
નિરવધિનિ સુખે ચેદસ્તિ સાક્ષાદપેક્ષા ।
ચરણનલિનયુગ્મે તાવકે દેવ કે વા
શરણવરણમેતે શ્રીપતે નાચરન્તિ ॥ ૪૨॥

વરદ મદપચારાઃ કિઞ્ચિદાલોચિતાશ્ચે-

ન્નલિનનયન નાલં નારકાસ્ત્વત્પ્રક્લૃપ્તાઃ ।
વિતરણકરુણાદ્યાસ્ત્વદ્ગુણાશ્શીલિતાશ્ચે-
દમૃતમપિ સુધાન્ધું [સુરાન્ધઃ] સ્વલ્પમિત્યપ્યવૈમિ ॥ ૪૩॥

હૃદિ મમ કલુષેઽસ્મિન્ પાદપદ્મં ત્વદીયં
ચરતુ કથમિદં તે નાથ હન્તેતિ ચિન્તામ્ ।
દુરુપલસુતનૃત્યદ્ભુતાનઃપ્રહાર-
પ્રભૃતિ ચરિતમસ્ય શ્રીપતે નિર્ધુનીતે ॥ ૪૪॥

અશરણં ભગવન્નભિરક્ષ મામયમહં ભવતઃ કરુણાપદમ્ ।
પ્રચુરરોગગણેન ચ પાપ્મનાં નનુ યતશ્ચયતઃ પ્રસૃતોઽસ્મ્યહમ્ ॥ ૪૫॥

અતિતરામપરાધપરમ્પરાં રચયતો મનુજાનભિરક્ષિતુમ્ ।
કમલયા સહખેલમભૂષયન્ હિ[દ્ધિ]તતમં તતમઞ્જનભૂધરમ્ ॥ ૪૬॥

ત્રિભુવનૈકવદાન્યમનન્યધીઃ કિમપિ નાથ ભવન્તમિહાર્થયે ।
તવ પદામ્બુજભક્તિમનુત્તમાં કલય મે લયમેતિ યથા[યા] તમઃ ॥ ૪૭॥

કૃતબુધાવમતીન્ કુમહીપતીનિહ વિહાય મદીયગિરાં ચયઃ ।
મધુરિપું ભજતાં મધુરસ્ફુરન્નવરસો વરસોમસુહૃન્મુખમ્ ॥ ૪૮॥

વિફલયા વિષયાન્તરચિન્તયા કિમનયાઽપિતુ કામપિ દેવતામ્
ભજ મનસ્સુમનઃપ્રકરૈઃ સદા નમસિતામસિતામ્બુધરોપમામ્ ॥ ૪૯॥

તવ રમાસખ તુઙ્ગતમા ક્ષમા તમપિ યેન રરક્ષિથ વાયસમ્ ।
ત્વદિતરો નિહતિં બત તત્ર કો ન કુરુતે કુરુતેઽપિ કૃતાગસિ ॥ ૫૦॥

અપિ કૃતાગસિ તેઽજનયત્ક્ષમાં મયિ રમા ક્ષણમપ્યનયા ભવાન્ ।
મુરરિપો વરિવર્તિ કન[કર]સ્ફુરદ્ઘનજયા ન જયાવહયા વિના ॥ ૫૧॥

મધુરિપો ભવદીયભુજાન્તરં મનસિ મે લગતાદ્ ધૃતકૌસ્તુભમ્ ।
સ્ફુરતિ યત્ર હિ માદૃશગુપ્તયે સરસિજોરસિજોપમિતાચલા ॥ ૫૨॥

ફણિપતિક્ષિતિભૃત્તટભૂષણે બલિરિપો હૃદયં રિપુભીષણે ।
ભવતિ રજ્યતિ મૂર્તિરિવોલ્લસન્મરતકે રતકેલિજુષઃ શ્રિયઃ ॥ ૫૩॥

ફણિગિરૌ હિ સ એવ ભવાન્ [વન્] ભવાન્મિતધિયામવનાર્થમવાતરત્
અવિરતં મુનયઃ કમલોલ્લસત્પદ હરે દહરે યમુપાસતે ॥ ૫૪॥

તાવકં કિમપિ દેવ કઞ્જભૂવામદેવવલશાસનાદિભિઃ ।

દૈવતૈરવિરતં નિષેવિતમ્ પાદપઙ્કજયુગં ભજામહે ॥ ૫૫॥

અઞ્ચતાં દુરિતપુઞ્જભઞ્જનાદઞ્જનાવનિધરાવતંસકાત્ ।
અન્યમત્ર નહિ ચિત્તમાનયે માનયે ન ચ વિરોધિહાનયે ॥ ૫૬॥

દાસમાવિધિ [થ] કયાસુ [ધુ] નન્દનં
દન્તિનં દશમુખાનુજં ઘ [શ્રિ] તમ્ ।
શ્રીનિવાસ ચરિતાનિ તે પરં કાનિ વા ન વિકૃતાનિ પણ્ડિતૈઃ ॥ ૫૭॥

રાજમાનવિભવાં મહીમરુદ્રાજમાનસવિહારહા [વા] સિકામ્ ।
માનયામિ ફણિશૈલદેવતામાનયામિ ચ તદઙ્ઘ્રિમાશયમ્ ॥ ૫૮॥

દેવકીતનય તાવકી તનૂરિન્દિરાવિહૃતિમન્દિરાયિતા ।
આતનોતિ મમ નૂતનોત્પલશ્યામલા પરમકોમલા મુદમ્ ॥ ૫૯॥

પ્રાતરાશયમહીશભૂમિભૃન્નેતરાશ [શ્ર] ય રમાપતે મમ ।
વીતરાગવિનુતાત્ ત્વદુચ્ચકૈર્નેતરાનિહ ભજામિ નિર્જરાન્ ॥ ૬૦॥

નીતિ [ચ] રાજિમનુસૃત્ય નિત્યમપ્યાચરામિ વિહિતં ન માધવ ।
ખેચરાભિનુત નો મતિર્ભવદ્રોચરાપિ કૃપયૈવ પાહિ મામ્ ॥ ૬૧॥

મેઘદર્પહરદીપ્તિવૈખરી શેખરીકૃતપદામ્બુજા સુરૈઃ ।
ભાવિતા મુનિભિરાદિદેવતા સં [સા] વતાદુપવિતા પદાઽવતા ॥ ૬૨॥

દુર્વચપ્રથિમગર્વચર્વિતપ્રાજ્ઞમુદ્ભિરકૃપૈરલં નૃપૈઃ ।
અઞ્જનાદ્રિચર કઞ્જનાભ તે ચિન્તયે વપુરરણ્ય શાન્તયે ॥ ૬૩॥

અપ્રબુદ્ધમકૃતત્વદઞ્જનં કઞ્જલોચન કૃતાત્મવઞ્ચનમ્ ।
ભાવિતાપરિચિતપ્રપઞ્ચનં પાહિ ચક્રધર મામકિઞ્ચનમ્ ॥ ૬૪॥

વરુણસ્ય ભક્તિમરુણસ્ય શૂલિનો વલશાસનસ્ય વનજાસનસ્ય વા ।
તનુતાં ચ નોત્ર વિનુતાં સુરૈસ્સમં સ્મર ગાઢભક્તિરુરગાદ્રિદેવતામ્ ॥ ૬૫॥

કમલાભિરામવિમલાયતેક્ષણાં કમનીયમૂર્તિમમનીષિદુર્ગમામ્ ।
પરમામુપસ્થિતરમામિમાં મનો ભજ ગાઢમેવ ભુજગાદ્રિદેવતામ્ ॥ ૬૬॥

સ્મરણં પદત્રભરણં મુકુન્દ તે યજનં પદાબ્જભજનં ચ કીર્તનમ્ ।
સ્તવનં ગુણાનુભવનં શુભાલયવ્રજનં
ચ હન્તિ વૃજિનં શરીરિણમ્ ॥ ૬૭॥

નિજવૈભવેન નહિ કેવલં સ્વયં તવ સારસત્વમુપયાતિ લોચનમ્ ।

નિજગોચરેऽપિ પુરુષે પરં રમાસખ સારસત્વમુપપાદયત્યદઃ ॥ ૬૮॥

રમયા સદૈવ રમમાણ ઉચ્ચકૈર્નરમાનિતસ્ત્વમિતિ નાથ સામ્પ્રતમ્ ।
નલિનાયતાક્ષ પરમેતદદ્ભુતં નમદિષ્ટકાર્યપિ મદિષ્ટકાર્યસિ ॥ ૬૯॥

દુરિતાનિ સાધુ ચરિતાનિ વા જનસ્તનુતે મુકુન્દ નનુ તે પ્રચોદનાત્ ।
ઉચિતે સ્તવં [વે] વિરચિતો [તે] પિ મે [વચઃ] પરિપોષણે
મધુરિપો તવ સ્પૃહા ॥ ૭૦॥

ઉરગેશભૂમિધરગેહમચ્યુતં શરણં ગતસ્ય તરણં ભવામ્બુધેઃ ।
સુકરં નનુ શ્રમકરં યદાશ્રયાત્ કપયોऽપિ નૈવ નપયોધિલઙ્ઘિનઃ ॥ ૭૧॥

દલિતોગ્રચાપ તુલિતોભ્ર [ગ્ર] ગૂઢપાદ્વિષયા ત્વન [દ]
ન્યવિષયાશયા કૃતમ્ ।
તવ નાગશૈલભવનાસ્મદાશયે ચિરમસ્તુ વીતવિરમસ્તુ સન્નિધિઃ ॥ ૭૨॥

હૃદયં પ્રવિશ્ય હૃતસર્વકલ્મષો વિદુષાં વિધાતુમપવર્ગમુત્સવમ્ ।
તનુતે તદીયતનુષુ પ્રહર્ષતઃ પુરુષોત્તમં સુ [મસ્સ]
પુલકાઙ્કુરાર્પણમ્ ॥ ૭૩॥

મદમોહલોભમુખવૈરિધૂતયે પરિતાપકારિદુરિતાપનીતયે ।
કિમપિ સ્મરામિ કમલાબ્ધિકન્ચકાકિલિકિઞ્ચિતૈકરસિકં પરં મહઃ ॥ ૭૪॥

અવિચ્છેદામોદા કલશજલરાશેર્દુહિતરિ-
સ્ફુરદ્રાગા નાગાધિપશિખરિણીશાદિમહિતા ।
અસૌ દાસત્રાસક્ષપણનિપુણા દુષ્ટદમને
કૃતાસક્તિવ્યક્તિર્નિગમગણગીતા વિજયતે ॥ ૭૫॥

વિદિત્વા તત્ત્વાર્થાનપિ વિશદમામ્નાયશિરસાં
પુરાણાનિ શ્રુત્વાપ્યસકૃદપિ બુદ્ધ્વા સ્મૃતિગિરઃ ।
સમાજે સ્થિત્વાપિ શ્રુતિનયવિદાં હન્ત વિદુષાં [વિષયાન્]
ન હાતું શક્તોહં નરકહર કિં મે ન દયસે ॥ ૭૬॥

ધનાયાભિઃ ક્ષુદ્રં નૃપમપિ વિના યાદવનુતિં
વપનાયાનીતીચ્છાં જનયસિ મહાયાસજનનીમ્ ।
અહન્તામાહત્મ્યાદસુરબલહન્તારમતુલં
ન હન્તારે ચેતો નયસિ ખલુ ચિન્તાવિષયતામ્ ॥ ૭૭॥

અશેષાન્ શેષાદ્રેરધિપ મમ દોષાન્નિરસિતું

મહત્પ્રાયશ્ચિત્તં મધુમથન નૈવાસ્ત્યનુગુણમ્ ।
પ્રપશ્યન્નાપીઠાન્મણિમકુટપર્યન્તમતુલં
પવિત્રં ગાત્રં તે પરમપુરુષાભૂવમનઘઃ ॥ ૭૮॥

સ્પૃહા દીનત્રાણસ્થિરબિરુદરક્ષાસુ યદિ તે
યશઃ પ્રાપ્તું વ્યાપ્તં યદિ ચ રુચિરાશાસુ દશસુ ।
તદાશૈષૈર્દોષૈઃ શરણિતમસમ્ભાવિતગુણં
વિપદ્ભ્યસ્ત્રાયેથા વૃષગિરિપતે ખિન્નમિહ મામ્ ॥ ૭૯॥

નરં વા દેવં વા કમપિ નલિનાક્ષ શ્રુતવતાં
પ્રસિદ્ધ્યન્તે [ન્તો] દૃષ્ટાઃ પરમભિમતર્થાઃ કતિપયે ।
પ્રપન્નાનાં ત્વાં નઃ પરમમધિપં બ્રૂહિ જગતા-
મહો કષ્ટં સિદ્ધ્યત્યભિલષિતમદ્યાપિ ન કથમ્ ॥ ૮૦॥

ધનાદિત્સોપજ્ઞવ્યસનજનિતપ્રાણિવિપદાં
મહીભૃત્પાશાનાં મદનમદનદ્ધોગ્રમનસામ્ ।
મુખં દૂરે હિત્વા મુરમથન મે લોચનયુગં
વદાન્યં વક્ત્રં તે વરદ શરદઃ પશ્યતુ શતમ્ ॥ ૮૧॥

નિયન્તા [ન્તર્વિ] વિશ્વેષાં નિયતમનુકૂલસ્તવ ભવન્-
નપન્થાનં મુઞ્ચન્નતિદૃઢમતિસ્ત્રાસ્યસ ઇતિ ।
વૃણાનો ગોપ્તા સ્યાઃ સ્વયમિતિ વિમુક્તેતરગતિઃ
પ્રપદ્યે ભીતોહં પરમપુરુષ ત્વામભયદમ્ ॥ ૮૨॥

ન દા [યા] તું ન સ્તા [સ્ના] તું ન ચ રચયિતું તે સ્તુતિગિરો
ન દા [ગા] તું ન ધ્યાતું ન કલયિતુમારાધનમપિ ।
ન યષ્ટું ન સ્પ્રષ્ટું કિમપિ તવ તુષ્ટ્યૈ પટુરહં
શરણ્યૌ તે લક્ષ્મીરમણ શરણં યામિ ચરણૌ ॥ ૮૩॥

અભક્ત્યા ભક્ત્યા વા શુચિરશુચિર્વા મધુરિપો
સકૃદ્વા ભૂયો વા સકલફલદં ત્વાં સ્મરતિ યઃ ।
નિરાતઙ્કં તુઙ્ગં નિખિલમપિ દત્સેઽભિલષિતં
ન કેષામાશ્ચર્યં જનયતિ તવૌદાર્યમતુલમ્ ॥ ૮૪॥

॥ ઇતિ શ્રી પઞ્ચમતભઞ્જન
વિખ્યાતતાતયજ્વભાગિનેયાપ્પોર્યામાદિયજ્વાત્રેયવંશમૌક્તિકાપ્પયાચાર્ય
તનૂભવશ્લેષયમકચક્રવર્તિરઘુનાથાચાર્યતનયસ્ય

શ્રીનિવાસકૃપાવિદિતનયસ્ય શ્રીસીતામ્બાગર્ભસમ્ભવસ્ય
કાઞ્ચીનગરવાસ્તવ્યસ્ય વેઙ્કટાચાર્યયજ્વનઃ કૃતિષુ શ્રવણાનન્દે
દ્વિતીય શતકં સમ્પૂર્ણમ્ ॥

શ્રવણનન્દપદ્યેષુ કાઠિન્યં યત્ર લક્ષિતમ્ ।
શ્રીશૈલસ્તાતયાચાર્યસ્તત્રૈવં વિવૃતિં વ્યધાત્ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

---

*shrIshrInivAsastavaH*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*